नं० ५५५२७ — घ

अजपास्तोत्रम् (तन्त्रम्)

पत्राणि २

(संपूर्णम्)

१४०

नं० ५५५८-च
अजपास्तोत्रम (तन्त्रम)
पत्रे २ (द्वे) (संपूर्णम्)

अजपास्तोत्र

नं० १०९१

ॐ तत्सद्ब्रह्मणे नमः

मूलाधारे वारिजपत्रे चतुरस्रे वं शं षं सं वर्णे विशालेसुवि
शाले रक्तवर्णे श्रीगणनाथं भगवंतं दत्तात्रेयं श्रीगुरुमूर्तिं प्र
णतोस्मि १ स्वाधिष्ठाने षट्दलपद्मे तनुलिंगं बालांतंत
स्वर्णमयाभसुविशाले पीतवर्णे वाक्पतिरूपं द्रुहिणं तं द
त्तात्रेयं॥ २ नाभौ पद्मं पत्रदशांकं डफवर्णे लक्ष्मीकांतं गरु
डारूढं नरवीरं नीलवर्णे निर्गुणरूपं निगमांतं दत्तात्रेयं॥ ३
हृत्पद्मांते द्वादशपत्रे कठवर्णे शैवं सांबं परमहंसं परमं तं
सर्गत्राणघ्यंतकरं तं शिवरूपं दत्तात्रेयं॥ ४ कंठस्थाने वक्र विशु
द्धकमलांते चंद्राकारे षोडपत्रे स्वरयुक्ते मायाधीशं जीवविशे
षं स्थितिमंतं दत्तात्रेयं॥ ५ आज्ञाचक्रे भ्रूयुगमध्ये द्विदलांते हंसं

बीजं ज्ञानसमुद्रं परमं तं विशुद्धं एवं ह्यात्मस्वरूपं निगमाब्धिं
दत्तात्रेयं · ६ मूर्ध्निस्थाने पद्मसहस्रैर्युतपद्मे पीयूषाब्धेरंत
रंगं तं ह्यमृतोऽजम् हंसाख्यं तं रूपमतीतं च तुरीयं दत्तात्रेयं · ७
ब्रह्मानंदं ब्रह्ममुकुंदादि स्वरूपं ब्रह्मज्ञानं ज्ञानमयं तं तमरू
पं ब्रह्मज्ञानं ज्ञानिमुनीन्द्रैः रुचितांगं दत्तात्रेयं · ८ शुभ्रं ता
कारं शेषशयानं सुरवंद्यं लक्ष्मीकांतं कोमलगात्रं कमला
क्षं चिंतारत्नं विघ्नघ्नं शरणं द्विजराजं दत्तात्रेयं · ९ चित्रैका
रैः सद्गुनिनादैः स्फूर्तिवचोभिः कादित्वांतैर्द्वंद्वस्वरवर्णैः परि
पूर्णं वेदांताद्यैस्तत्वज्ञानैरनुवंद्यं दत्तात्रेयं · १०

2

आधारे लिंगनाभौ हृदय सरसिजे तालुमूले ललाटे
द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के वासांते
बालमध्ये डफकठसहिते कंठदेशे स्वराणां हं क्षं तत्त्वार्थ
युक्तं सकलदलगतं वर्णरूपं नमामि ॥ ११ हंसो गण्येशो वि
धिरपि च हंसो हंसो हरिर्हि स मयस्सुशंभुः हंसोहमात्माप
रमात्मा हंसो हंसो हि जीवो गुरुरपि च हंसः १२ गमागम
स्थं गमनादिशून्यं चिद्रूपरूपं तिमिरापहारं पश्यामितं
सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् १३ हंसहंसेति
यो ब्रूयाद्यो वै नाम सदाशिवः मानवस्तु पठेन्नित्यं ब्रह्म
लोकं स गच्छति । इति श्री अजपास्तोत्रं समाप्तं तत्सत् ।

२

नं. १०५९

83

